Shastri III yr. (Vyakarana) 6th semester Paper VI

महाभाष्यम्  Dr. Lalitha Chandran

---

1. 'अइउण्' इति सूत्रे अकारः विवृतः संवृतो वा?

विवृतः।

2. अकारस्य विवृतोपदेशः कथं कर्तव्यः?

अकारः सवर्णग्रहणेन आकारमपि यथा गृह्णीयात् इत्येतदर्थं अकारस्य विवृतोपदेशः कर्तव्यः।

3. दीर्घप्लुतौ संवृतौ कथं न भवतः?

दीर्घप्लुतौ न च लोके न च वेदे संवृतौ स्तः। अतः यौ स्तः तौ भविष्यतः।

4. पुनः स्थाने ग्रहणस्य प्रयोजनं किमस्ति?

'स्थानेऽन्तरतमः' इत्यत्र 'षष्ठी स्थानेयोगा' इति सूत्रात् स्थाने इत्यनुवर्तमाने पुनः स्थाने ग्रहणस्य प्रयोजनमस्ति यत् यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीय इति परिभाषायाः सिद्धिः।

5. शिवसूत्रेषु कथं न संहिताकार्यम्?

शिवसूत्रेषु संहितायाः अविवक्षया न संहिताकार्यम्। केचित्तु अइउण् इत्यादीनां चादिगणे पाठात्, निपातत्वेन च 'निपात एकाजनाङ्' इति सूत्रेण प्रगृह्यसंज्ञत्वात् प्रकृतिभावेन न सन्धिरिति प्रतिपादयन्ति।

6. अकारस्य एकत्वे के त्रयो दोषाः?

(1) अनुबन्धसाङ्कर्यरूपः प्रथमो दोषः।

(2) एकाजनेकाज्ग्रहणेषु च अनुपपत्तिः इति द्वितीयः।

(3) द्रव्यवच्चोपचाराश्च अकारस्यैकत्वे प्राप्नुवन्ति।

*

7) इत्यवशोपन्यासश्च इति दोषं निराकुरुत?

यथा घटस्य दर्शने स्पर्शनम् अनेकोऽपि युगपत्करोति तथा अकारस्योच्चारणं अव सम्भवति। अनेकोऽपि तद् युगपत्करिष्यति।

8) शकुनिवत्स्युः इत्यस्याभिप्रायं लिखत।

तद्यथा शकुनयः आशुगामित्वात् पुरस्तादुत्पतिताः पश्चात् दृश्यन्ते। अल्पमकाशे 'इ' इत्यत्र दृष्टो 'उ' इत्यत्र दृश्यते।

9) आदित्यवत्स्युः इत्यस्याभिप्रायं लिखत।

तद्यथा एकः आदित्यः अनेकाधिकरणस्थः युगपत् देशपृथक्त्वेषूपलभ्यते तथा अल्पमकाशेऽपि। इत्यमकारस्यैवत्वं सिद्ध्यति।

10) आकृतिग्रहणात् सिद्धमित्यस्याभिप्रायं लिखत।

सर्वत्र आकृतेः ग्रहणात् सर्वदासिद्धिः भविष्यति। अर्थात् अवर्णाकृतिः उपदिष्टा सर्वम् अवर्णकुलं ग्रहीष्यति। तथैवर्णाकृतिः, तथोवर्णाकृतिः।

11) ऌकारोपदेशस्य किं प्रयोजनम्?

ऌकारोपदेशः क्रियते। (above line: ऌतात्र्यर्थश्च यदृच्छाशब्दार्थः अशक्तिजानुकरणार्थः)

12) के पुनः प्लुत्यादयः?

प्लुतिद्विर्वचनस्वरिताः प्लुत्यादयः सन्ति।

13) स्वरितस्य किमुदाहरणम्?

स्वरितस्य उदाहरणं 'प्रक्लृप्त' इति।

14) सिद्धान्ते यदृच्छाशब्दार्थः ऌकारोपदेशः कर्तव्यो न वा?

न सन्ति यदृच्छाशब्दाः। पक्षान्तरैरपि परिहारा भवन्तीति वचनेन भाष्यकारेण यदृच्छाशब्दार्थं ऌकारोपदेशो न कर्तव्य इति प्रतिपादितम्।

15. सिद्धान्ते अक्षरितानुकरणार्थः ऌकारोपदेशः कर्तव्यो न वा?

अक्षरितानुकरणार्थः ऌकारोपदेशः कर्तव्य एवेति भाष्यकारः।

16. सिद्धान्ते प्लुताद्यर्थः ऌकारोपदेशः कर्तव्यो न वा?

प्लुताद्यर्थः ऌकारोपदेशः कर्तव्यः।

17. 'ऋऌक्' 'ऐऔच्' इति सूत्रे तपरोपदेशः कर्तव्यो न वा?

न कर्तव्यः।

18. अर्द्ध एकारः, ओकारो वा भवति न वा?

नैव लोके न च वेदे अर्द्ध एकारः ओकारो वा भवति।

19. तपरः इत्यस्य विग्रहं समासं च लिखत?

तः परो यस्मात् सः इति विग्रहे बहुव्रीहिसमासः,

तात्परः इति विग्रहे तत्पुरुषसमासश्च वर्तते।

20. वर्णैकदेशाः वर्णग्रहणेन गृह्यन्ते न वा?

न गृह्यन्ते।

21. खट्वाभिः मालाभिः इत्यत्र ऐस्भावः कथं न?

'अतो भिस ऐस्' इति सूत्रे अत् इत्यत्र तपरकरण-

सामर्थ्यात् ऐस्भावः न भवति।

22. अग्रहणपक्षे के के दोषाः समापतन्ति?

अग्रहणपक्षे नुड्विधिलादेशविनामेषु ऋकारग्रहणरूपदोषः,

'प्लुतावैच इदुतौ' इति सूत्रकरणरूपदोषः, तुल्यरूपे संयोगे

द्विव्यञ्जनविधिभावरूपदोषः, समागच्छति। वस्तुतस्तु

सर्वेषां दोषाणां निराकरणेन अग्रहणपक्ष एव महाभाष्यकारेण

सिद्धान्तितः।

23. हकारः कस्मिन् कस्मिन् सूत्रे उपदिष्टः?

'हयवरट्' सूत्रे 'हल्' सूत्रे च।

24. हकारस्य पूर्वोपदेशे को दोषः?

हकारस्य पूर्वोपदेशे किन्त्वसेड्विधौ अल्ग्रहणानि च।

25. हकारस्य परोपदेशे को दोषः?

हकारस्य परोपदेशे अग्रहणेषु ग्रहणं कर्तव्यम्।
'महाँ हि सः' इत्यत्र आतोऽटि नित्यमित्यनेन अनुनासिकत्वं 'दीर्घादटि समानपदे' इत्यनेन हकारे परे नकारस्य रुत्वं यथा स्यात्। 'पुरुषो हसति' इत्यत्र 'हशि च' इति सूत्रेण हकारे परे उत्वं च यथा स्यात्। अन्यथा हकारस्य परोपदेशेऽट् प्रत्याहारान्तर्गतत्वाभावेन रुत्वम्, अनुनासिकत्वं, उत्वं च न स्यात्। तस्मात् 'हयवरट्' इत्यत्र हकारोपदेश अवश्यमेव कर्तव्यः।

26. अधुक्षत् अलिक्षत् इत्यत्र केन सूत्रेण क्सादेशः भवति?

"शल इगुपधादनिटः क्सः" इति सूत्रेण भवति।

27. रुदिहि, स्वपिहि इत्यत्र केन सूत्रेण ~~कस्य लोपः?~~ इडागमः भवति?

'रुदादिभ्यः सार्वधातुके' इति सूत्रेण।

28. अदाग्ध्याम् अदाग्धम् इत्यत्र केन सूत्रेण कस्य लोपः?

"झलो झलि" इति सूत्रेण सिचः सकारस्य लोपः भवति।

29. रेफस्य परोपदेशे को दोषः?

रेफस्य परोपदेशे अनुनासिकद्विर्वचनपरसवर्णप्रतिषेधः।

30. रेफस्य पूर्वोपदेशे को दोषः?

रेफस्य पूर्वोपदेशे कित्वप्रतिषेधो यलोपवचनं च।

II 1. अयोगवाहानां परिचयं विधाय प्रदाय तेषामुपदेशः कुत्रेति विस्तरेण विचार्यताम्।

वर्णाः द्विधा सन्ति - अकारादयः स्वरवर्णाः, हकारादयः व्यञ्जनवर्णाश्च। अक्षरसमाम्नाये एषामुपदेशो वर्तते। ~~किन्तु~~ केचनवर्णाः प्रयोगेषु दृश्यन्ते किन्तु अक्षरसमाम्नाये तेषां सम्बन्धो नास्ति। एतादृशा वर्णा इमे सन्ति - विसर्जनीयः, जिह्वामूलीयः, उपध्मानीयः, अनुस्वारः, आनुनासिक्यम्,

यमाश्च । एते वर्णाः अयोगवाहाः कथ्यन्ते । ~~अयोग~~ अयोगवाहशब्दे बहुव्रीहिगर्भः कर्मधारयो भवति । न योगः अक्षरसमाम्नाये उपदेशाभावेन सम्बन्धो येषां ते अयोगाः, वहन्ति प्रयोगं निर्वाहयन्ति इति वाहाश्चेति अयोगवाहा इति विग्रहो भवति ।

इदानीं क्व पुनरेषामुपदेशः कर्तव्यः इति प्रश्ने प्रथमं – अयोगवाहानामट्सूपदेशः कर्तव्यः इत्युच्यते । तथा सति ते अड्ग्रहणेन गृह्यन्ते । एवं सति उरः केण उरः पेण इत्यत्र "कुप्वोः ≍क≍पौ च" इति सूत्रेण विसर्गस्य स्थाने विकल्पेन जिह्वामूलीय उपध्मानीयश्च भवति, तयोः अड्ग्रहणेन ग्रहणात् अट् व्यवधाने जाते "अट्कुप्वाङ्नुम्व्यवायेऽपि" इति सूत्रेण णत्वं भवति । ~~अर्ध~~ 'उर≍केण' इत्यत्र ककारात् प्राग् अर्धविसर्गसदृशो वर्णो जिह्वामूलीयः, 'उर≍पेण' इत्यत्र पकारात् प्राग्अर्धविसर्गसदृशो वर्णः उपध्मानीयः विद्यते ।

अनन्तरं शर्षूपदेशः कर्तव्य इत्युच्यते । तस्य प्रथमं प्रयोजनम् – उब्जिता, उब्जितुम् इति प्रयोगसिद्धिः । उब्ज्धातोः उपधा उपध्मानीयो विद्यते उपध्मानीयस्य स्थाने 'झलां जश् झशि' इति सूत्रेण जश्त्वे बकारो भवति । तदेव उक्त रूप सिद्ध्यतः । यदि उपध्मानीयस्य पाठः शर्प्रत्याहारे भवति तदा एव झल् प्रत्याहारेण तस्य ग्रहणं भवति । पाठं विना उपध्मा झल्त्वं कथमपि न सम्भवति । अतः अयोगवाहस्य पाठः शर्षु कर्तव्यः ।

इदं प्रयोजनं वार्तिककारस्य मते विद्यते । भाष्यकारमते दकारोपधः उद्ज इति धातुरस्ति ।

यदि उपध्मानीयोपदेशस्य पाठो क्रियते मन्यते तदा सन्प्रत्यये उब्जिजिषति इति रूपस्य सिद्धिर्न स्यात्, यतो हि 'अजादेर्द्वितीयस्य' इति सूत्रेण द्वितीयस्य एकाचो द्वित्वं भवति। तथा सति 'उब्बिजिषति' इत्यनिष्टं रूपं स्यात्। तस्मात् उब्जेः उपध्मानीयोपधो न स्वीकार्यः। दकारस्य द्वित्वं न भविष्यति, 'न न्द्राः संयोगादयः' इति निषेधात्। अतः जकारस्यैव द्वित्वे उब्जिजिषति इति रूपसिद्धिः।

एवं सति भाष्यमते 'उब्जिता' 'उब्जितुम्' इत्यस्य सिद्धिः कथमिति चेदुच्यते — ~~आसिद्ध~~ असिद्धप्रकरणे त्रिपाद्यां "स्तोः श्चुना श्चुः" इति सूत्रादनन्तरं 'भ उद्जेः' इति वचनं करिष्यते। उद्जेः श्चुना योगे ~~भका~~ भकारो भवतीति तस्यार्थो भविष्यति। तेन दकारस्य स्थाने भकारे भकारस्य स्थाने 'झलां जश् झशि' इति जशि बकारे च उब्जिता इत्यादि रूपं सेत्स्यति। भाष्यमते 'भ उद्जेः' इति वचने गौरवं वर्तते इति चेदुच्यते — अस्य वचनस्य आवश्यकता नास्ति। दकारस्य भत्वं निपातनादेव सिद्धम्। भगवान् पाणिनिः 'भुजन्युब्जौ पाण्युपतापयोः' इति सूत्रं निर्माति। अनेन सूत्रेण भुजन्युब्जशब्दौ संज्ञायां निपात्येते।

द्वितीयं प्रयोजनमुक्तं वार्तिककृता — षत्वमिति। इदं भाष्यकृतापि स्वीकृतम्। सर्पिःषु धनुःषु इत्यादौ 'शर्व्यवाये' इति षत्वं सिद्धं भवतीति 'नुम्विसर्जनीयशर्व्यवायेऽपीति' विसर्जनीयग्रहणं न कर्तव्यं भवति।

अपरः पक्षः अविशेषेण उपदेशः इति। अयोगवाहानामुपदेशः न केवलमष्टसु कर्तव्यः, नापि च केवलं शर्षु, अपि तु विशेषस्य प्रयोजनस्य अपेक्षाम् अकृत्वैव सकलानां प्रयोजनानाम् उद्देश्येन अक्षरसमाम्नाये उपदेशः कर्तव्यः इति।